विभाजके अवयवे, "अवरुद्धांशाः समाख्याताः षष्ठ्युत्तरशतत्रयमिति "चेत्रं होरा च द्रेक्काणं नवांशोद्वादशांशकः। त्रिंशांशश्चेति विज्ञेयः षड्वर्ग इति च ज्योतिषम् नवमितोऽंशः (राशेस्त्रिंशभागः) नवांशः एवं द्वादशांशादयः। स च अंशः षष्टिकलात्मकः कला तु षष्टिविकलात्मिका। नवमिविभक्ते राशेः त्रिंशात्मके नवांशे च। "द्विभर्त्तृका मेषनवांशके स्यात्" इत्युपक्रम्य "निःस्वा स्वगांशे" इति, "विगुणा घटांशे" इति च व्यवहारचमत्कारः। ६, १, २०३ पा० सू० वृषादिषु पाठात् अस्य आद्युदात्तत्वम्।

**अंशक** त्रि० अंश-ण्वुल्। विभाजके। स्त्रियाम् अंशिका। ज्ञातौ दायादे पु० अंश+स्वार्थे कन्। अंशशब्दार्थे "त्रिंशांशकस्तथा राशे भांग" इत्यभिधीयते इति ज्योतिषम् नवमिते राशित्रिंशभागात्मके नवांशे, "द्विभर्तृका मेषनवांशके स्यात् इत्युपक्रम्य" "वृषांशके सा पशुशीलयुक्तेति" सिंहांशके सा पितृवासरस्थितेति, च ज्यो० सौरदिने न०।

**अंशल** त्रि० अंश+बलोपाधिके मत्वर्थे लच्। बलवति। अंशं लाति ला+क। अंशग्राहके त्रि०।

**अंशसवर्णन** न० समानोवर्णः योगवियोगयोग्यता सवर्णः ततः करणार्थे णिचि भावे ल्युट् सवर्णनम् अंशयोः अतुल्यच्छेदयोः राश्योः समच्छेदकरणम् ६त०। लीलावत्युक्ते अतुल्यच्छेदराश्योः योगवियोगयोग्यतासम्पादके समच्छेदसाधने क्रियाविशेषे, तत्रादावंशसवर्णनमित्युक्तमत्र "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवमिति लीलावत्यामुक्तम्।

**अंशहर** त्रि० अंशं हरति हृ-अच्। अंशहारके "हंशहरोऽर्द्धहरो वा पुत्रवित्तार्ज्जनात् पितेति" स्मृतिः। अनुद्यमने एव हृञोऽच् इति नियमात् अन्यत्र अण्। भारहारः।

**अंशावतरण** न० ६ त०। भारते आ०प०६४अ० उक्ते देवानां स्वस्वभागविशेषेण वासुदेवादिरूपेण पृथिव्यामाविर्भावेन नरदेहग्रहणरूपे अवतरणे।

**अंशिन्** त्रि० अंश-णिनि। अंशकारके "पुनर्विभागकरणे सर्व्वे वा स्युः समांशिन" इति स्मृतिः अंश+मत्वर्थे इनि। अवयविनि। "अंशिनः स्वांशगात्यन्ताभावं प्रति स्वमात्मतेति" वेदान्तपरिभाषा।

**अंशु** पु० अंश-दृग० कु। किरणे सूत्रे सूक्ष्मांशे प्रकाशे प्रभायां वेगे च "अंशवोऽत्र पतिता रवेः किमु"? इत्युद्भटः "सूर्य्यांशुभिर्भिन्नमिवारविन्दमिति" कुमा०। तत्र स्वपरप्रकाशकस्य तेजःपदार्थस्य समन्तात् प्रसृतः स्पर्शयोग्यः किञ्चिन्निबिडः सूक्ष्मांशविशेषः किरणः, स च प्रायशः सूर्य्यस्य, तस्य तेजसा प्रदीप्तचन्द्रादेश्च। तदपेक्षया अल्पस्थानप्रसारी किञ्चिद्विरलः स्पर्शायोग्यः तेजःसूक्ष्मांशः प्रभा, सा च रत्नादिवस्तुनः। चन्द्रादेस्तु अन्यापेक्षयाऽधिकप्रसृतत्वात् किरणसम्भवः अतएव तत्र शीतांशुः सितकिरण इत्यादिप्रयोगः। स्पर्शयोग्यः तेजःपदार्थस्य किरणादपि निबिडः सूक्ष्मांशः आतपः, किरणापेक्षया अतिविरलप्रसारी स्पर्शायोग्यः परप्रकाशसाधनमतिसूक्ष्मांशविशेषः आलोकः। प्रभायाम् आलोके वा न स्पर्शोऽनुभूयते। तत्र अंशुशब्दस्य किरणवाचित्वे सहस्रांशुः उष्णांशुः शीतांशुरित्यादयः। प्रभापरत्वे रत्नांशुः नखांशुरित्यादयः। "अजस्रमास्फालितवल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नयेति" "द्विजावलीबालनिशाकरांशुभिरिति" च माघः। सूत्रांशपरत्वे अंशुकं पट्टांशुकं चीनांशुकमित्यादयः। प्रकाशपरत्वे उपांशु उपह्नृतप्रकाशत्वाच्चास्य गुप्तत्वं प्रतीयते तच्चार्थिकम्। सूक्ष्मविभागपरत्वे प्रांशुः प्रोन्नतावयवत्वा च्चास्य दीर्घत्वं प्रतीयते तच्चार्थिकम् इति।

**अंशुक** न० अंशवः सूत्राणि विषयोऽस्य अंशु+ऋष्यादि० क। वस्त्रे। "यत्रांशुकाक्षेपविलज्जितानामिति" कुमारः। सूक्ष्मवस्त्रे उत्तरीयवस्त्रे पत्रे (तेज पात) शुक्लवस्त्रे च। अंशु+स्वार्थे कन्। अंशुशब्दार्थे पु०।

**अंशुधर** पु० धृ-अच् ६त०। सूर्य्ये अंशुभृदादयोऽप्यत्र किरणादिधारके वेगधारके च त्रि०।

**अंशुपट्ट** न० अंशुना सूक्ष्मसूत्रेण युक्तं पट्टम्। सूक्ष्मसूत्रघटितपट्टवस्त्रे। "श्रीफलैरंशुपट्टानामिति" विष्णु०।

**अंशुपति** पु० ६त०। सूर्य्ये, तस्य सर्व्वतेजस्विनां किरणाधायकत्वात् चन्द्रादिष्वपि तेजोदायकत्वाच्चास्य तथात्वम् अतएवोक्तं वृहत्संहितायाम् "सलिलमये शशिनि रवेर्दीधितय" इति "मूर्च्छितं परिकलितः शशिभत" इति वृहज्जातके च। "अग्निं वावादित्यः सायं प्रविशतीति" "उद्यन्तं वावादित्यमग्निरनुसमारोहतीति" च श्रुतौ अग्नौ सूर्य्यांशुप्रवेशाभिधानम्। अत एव माघे तस्य त्विषां पतित्वेन तस्यास्तमये तासामनुमरणार्थं ज्वलनप्रवेश उक्तः। यथा "रुचिधाम्नि भर्त्तरि भृशं विमलाः परलोकमभ्युपगते विविशुः। ज्वलनं त्विष इति"। एवं अंशुस्वामी त्विट्पतिप्रभृतयोऽप्यत्र।

**अंशुमत्** पु० अंशु+अस्त्यर्थे मतुप्। सूर्य्ये, अंशुमाल्यादयो-